(ग) पुनश्च द्विवर्षीयपुरातनशास्त्रिपरीक्षामुत्तीर्णा एकेन पृथक्शपथपत्रेण एतद् घोषयेयु: यत् 'आङ्गलोपाख्यया सह नूतनाचार्यपरीक्षायां कृतकार्या एवं नूतनाचार्यपाठ्यक्रमप्रमाणपत्रं लब्धुमर्हाम' इति ।

**3.** ***आवेदनप्रणाली (Mode of Application)***

(क) अस्य विश्वविद्यालयस्य शास्त्रिपरीक्षाया: परिणाम: यस्मिन् दिवसे प्रकाश्यते तत: पञ्चदशतमदिवस आवेदनपत्रग्रहणार्थमन्तिमो दिवस: ।

(ख) आवेदनपत्रग्रहणस्य अन्तिमदिवसात्परं प्रप्तानि आवेदनपत्राणि नामाङ्कनार्थं नैव विचारयिष्यन्ते ।

(ग) असंपूर्णमावेदनपत्रं विचारार्थं न स्वीक्रियते ।

(घ) प्रार्थी / प्रार्थिनी वक्ष्यमाणै: प्रमाणपत्रै: सह आवेदनपत्रं स्वहस्ताक्षरेण पूरयित्वा प्रेषयेत् यथा–

(i) मध्यमा/मात्रिक, उपशास्त्री (+2), शास्त्री (+3) इति संस्कृतसहितानां परीक्षाणां लब्धाङ्कपत्राणां सत्यापिता: प्रतिलिपय: ।

(ii) मध्यमा/मात्रिक, उपशास्त्री (+2), शास्त्री (+3) इति परीक्षाणां मूलप्रमाणपत्राणां सत्यापिता: प्रतिलिपय: ।

(iii) चरित्रप्रमाणपत्रस्य सत्यापिता प्रतिलिपय: ।

(iv) उपजाति: / अनुसूचितजातिश्चेत् तद्विषयिणी सत्यापिता प्रतिलिपि: । (यदि प्रार्थी / प्रार्थिनी एतज्जातीय: / या स्यात्) ।

(v) जातीयस्तरीयक्रीडाप्रमाणपत्रम् (किञ्चित् आस्ति चेत्) तस्य सत्यापिता प्रतिलिपि: ।

(vi) अङ्गवैकल्यप्रमाणपत्रम् अन्यत् किञ्चित् (अस्ति चेत्) तस्य सत्यापिता प्रतिलिपि: ।

(vii) आवेदनपत्रं संस्कृतभाषयैव पूरणीयम् ।

**(छ)** ***मानाङ्कनम् (Admission)***

पत्रालयमाध्यमेन नामाङ्कनं विधास्यते । आधिकाधिकतया पञ्चदिनात्मक: पत्रालयीयविलम्ब: कुलपरिद्वारा क्षमणीयो यदि नामाङ्कनार्थं निर्दिष्टदिवसस्य दिनत्रयात् प्राक् प्रर्थिना स्वावेदनपत्रं पत्रालये पञ्जीकृतम्, यत्र पत्रालयीयविलम्ब: तत्र नामाङ्कनार्थं योग्यविवेचितानां प्रर्थिनामावेदनपत्राणि परवर्त्तिपर्यायस्थितावेदनपत्रै: सह विचारणीयानि भवेयु: । तदर्थं लब्धेन सूचनापत्रेण साकं वक्ष्यमाणानि मूलप्रमाणपत्राणि संयोज्य अवश्यं प्रेषयितव्यानि अन्यथा नामाङ्कनं न भवेत् यथा –

(i) मध्यमा/मात्रिक, उपशास्त्री (+2), शास्त्री (+3) इति परीक्षाणां मूलप्रमाणपत्राणि ।

(ii) मध्यमा/मात्रिक, उपशास्त्री (+2), शास्त्री (+3) इति परीक्षाणां मूललब्धाङ्कपत्राणि ।

(iii) अन्तिममहाविद्यालयपरित्यागमूलप्रमाणपत्रम् (विभागेन स्वायत्तीकरिष्यते) ।

(iv) मूलचरित्रप्रमाणपत्रम् (विभागेन स्वायत्तीकारिष्यते)

(v) सद्य आवक्षश्छायाचित्रस्य चत्वारि सत्यापितानि प्रतिरूपाणि ।

(vi) उपजाति: / अनुसूचितजाति: (चेत्) तद्विषयकं मूलप्रमाणपत्रम् ।

(vii) जन्मदिनाङ्कसूचकमूलप्रमाणपत्रम् ।

(viii) क्रीडा / अङ्गवैकल्यम् / अन्यत् किञ्चित् (चेत्) तस्य मूलप्रमाणपत्रम् ।

(ix) नामाङ्कनार्थं धनराशि: केवलं धनागारीय-धनपत्रद्वारा (by Account payee Bank Draft) प्रेषणीय: ।

(x) प्रव्रजनमूलप्रमाणपत्रम् (Migration Certificate)
(अन्यविश्वविद्यालयस्य प्रार्थी / प्रार्थिनी चेत्)

**(ज) एकाधिकविभागेभ्य आवेदनं पृथगावेदनपत्रेण कर्त्तव्यम् ।**

4. विभागेषु स्थानसंख्यामधिकृत्य प्रवेशो दीयते ।

5. केवलं शिक्षायोगयताभित्त्या नामाङ्कनं भवेत् ।

6. नात्र कश्चन / काचन अधिकारं प्रकटय्य नामाङ्कनं कर्त्तुमिच्छेत् ।

7. ***पाठ्यक्रम: (Courses of Studies )***

तत्र सत्रं षाण्मासिकं भवति । आचार्यपरीक्षा वर्षद्वयात्मिका । एवं वर्षद्वये आहत्य चत्वारि सत्राणि । तत्र द्वादशपत्रेषु द्वादशशताङ्कानां कृते पाठ्यक्रमो निर्द्धारित: । प्रतिसत्रं पत्रत्रयं भविता । प्रतिसत्रान्तं विश्वविद्यालयीया परीक्षा भविष्यति । प्रतिपत्रम् उत्तीर्णाङ्का: (30) त्रिंशत्परिमिता: ।

सत्रीयपरीक्षामुत्तर्तुं सम्मिल्य (In aggregate) पत्रत्रये प्रतिशतं (36%) षट्त्रिंशत्परिमिता: अङ्का: आवश्यका: । अनुतिर्णपत्रस्य परीक्षा पुन: तत्सम्बन्धिसत्रे एव दातुं शक्यते। अर्थात् प्रथमसत्रे यस्मिन् पत्रे अनुतीर्ण: तत्पत्रस्य परीक्षां तृतीयसत्रे, द्वितीयसत्रे च अनुत्तीर्ण: तत्पत्रस्य परीक्षां चतुर्थसत्रे पुन: प्रदातुमर्ह:। एवमेव तृतीयसत्रे अनुत्तीर्ण: तत्परवर्त्तिप्रथमसत्रे अर्थात् तृतीयवर्षे, चतुर्थसत्रे अनुत्तीर्ण: तत्परवर्त्तिद्वितीयसत्रे तृतीयवर्षे पुन: परीक्षां प्रदातुमर्ह: स्यात् ।

अङ्कवृद्धयर्थं /श्रेणीवृद्धयर्थं यस्य कस्यापि पत्रस्य पुन:परीक्षा तत्परवर्त्तिसम्बन्धिसत्रे एकवारमेव दातुं शक्यते । तत्र द्वयो: परीक्षयोर्मध्ये सवाधिकलब्धाङ्क: फलप्रकाशनार्थं समुदाये गणनीय:।

8. ***पञ्जीकरणम् (Registration):***

(क) प्रत्येकमावेदनपत्रस्य निर्दिष्टे स्थाने विश्वविद्यालयस्य पञ्जीकरणसंख्या उल्लेख्या । अस्य विश्वविद्यालयस्य पञ्जीकरणसंख्यामलभमान: (ना) स्वनामाङ्कनं कर्त्तुं नार्हेत्।

(ख) प्रत्येकं छात्र: /छात्रा प्रथमवर्षीयपञ्जीकरणार्थं चत्वारिंशद्रूप्यकाणि (Rs.40.00) द्वितीयवर्षीयपञ्जीकरणार्थं च विंशरूप्यकाणि (Rs.20.00) अवश्यं दद्यात्।

**9. *इतरविषयककार्यकलाप: (Extra Curricular Activities)***

स्नात्तकोत्तरविभागेषु जातीयसेवायोजनायां वर्गद्वयमस्ति, यत्र छात्रा: भागं ग्रहीतुं पारयेयु:।

***10. संरक्षणम् (Reservation)***

(क) प्रतिविभागं समुदायस्थानसंख्यात: उपजातीनां (S.C) कृते प्रतिशतं 16.25%,अनुसूचितजातीनां (S.T), कृते प्रतिशतं 22.50% स्थानानि संरक्षितानि सन्ति।

(ख) यदि एतद्वर्गाणां प्रार्थी / प्रार्थिनी न लभ्यते तर्हि साधारणवर्गीयप्रार्थिना (न्या) रिक्तं स्थानं पूरयिष्यते।

(ग) अङ्गवैकल्यग्रस्तछात्राणां कृते प्रतिशतं त्रीणि स्थानानि संक्षितानि सन्ति (3% of seats will be reserved)

***11. नामाङ्कनार्थं गुरूत्वप्रदानं विशेषविचारश्च (Weightage for Admission)***

(क) क्रीडाकृतां जातीयस्तरे राज्यस्तरे च गृहीतभागानामान्तिमपरीक्षालब्धाङ्के क्रमेण प्रतिशतं दशाङ्कान् पञ्चाङ्कांश्च योजयित्वा परिगणनीयम्।

संरक्षणविषये गुरुत्वदानविषये च प्रार्थिभि: तत्तसम्बन्धाधिकारीभ्य: सन्तोषावहमसन्धिग्धञ्च मूलप्रमाणपत्रमानीय स्वावेदनपत्रेण साकं संयोज्य प्रेषितञ्चेत् तत् विचार्य नान्यथा।

***12. छात्रवृत्ति: (Scholarship)***

(क) विश्वविद्यालयच्छात्रवृति: शिक्षागतयोग्यताभित्त्या केवलमाचार्यछात्राणां कृते प्रतिमासं दीयते।

(ख) अव्यवहितपूर्वपरीक्षायां (यामाधृत्य नामाङ्कनं विहितं)साकल्येन प्रतिशतं चत्वारिंशत् (40%) अङ्कानां प्राप्तवन्त: (त्य:) एतच्छात्रवृतिं लब्धुमावेदयितुमर्हन्ति,ततो न्यूनाङ्कप्रप्तवत: (त्या:) अर्हता नास्ति।

(ग) शास्त्रिपरीक्षोत्तीर्णानां संस्कृतसम्मानसहित-वी.ए. परीक्षोत्तीर्णानां छात्राणां कृते छात्रवृतिप्रदानविचारेऽग्राधिकारो दीयते।

(घ) छात्रवृतिलब्धये प्रतिमासम् अध्यापितानां कालाशांनां प्रतिशतं पञ्चसप्ततिकालांशेषु (75%) उपस्थिति: स्वक्रियते।

(ङ) कस्यचिदत्यन्तदुर्व्यवहारजनितस्य खेदस्य हेतो: विश्वविद्यालय: स्वविचारेण येषां केषाञ्चन मासानामथवा स्थायित्वेन पूर्णतया छात्रवृतिं स्थगयितुमधिकारी वर्त्तते।

(च) छात्रवृत्तिप्राप्तये विभागाध्यक्षा: स्वविभागीयच्छात्राणां शिक्षायोग्यताभित्या नामक्रमसूचिं निर्माय स्नातकोत्तरपरिषदध्यक्षमाध्यमेन कुलपतीनां कृते प्रेषयिष्यन्ति। कुलपतय: छात्रवृत्तिदानाय विश्वविद्यालयद्वारा स्थिरीकृतां छात्रवृत्तिसंख्यां विचार्य शिक्षायोग्यताभित्या निर्मितां क्रमसूचीमनुमंस्यन्ते।

13. *देयम् (Fees)*

(क) नामाङ्कनसमये प्रत्येकं छात्र: (त्रा) वक्ष्यमाणं देयमवश्यं दद्यात् ।

## प्रवेशकालीनदेयम् (Fees at the time of admission)

| | | | |
|---|---|---|---|
| (i) | नामाङ्कनदेयम् (Admission Fee) | Rs. | 20/- |
| (ii) | परिचयपत्रदेयम् (Cost of Identity Card) | Rs. | 14/- |
| (iii) | पत्रिकादेयम् (Magazine Fee) | Rs. | 20/- |
| (iv) | सत्रदेयम् (Session Fee) | Rs. | 20/- |
| (v) | वार्षिकोत्सवदेयम् (Annual Function Fee) | Rs. | 20/- |
| (vi) | क्रीडादेयम् (Athletic Fee) | Rs. | 20/- |
| (vii) | चर्चासत्रदेयम् (Seminar Fee) | Rs. | 20/- |
| (viii) | नाट्योत्सवदेयम् (Dramatic Function Fee) | Rs. | 20/- |
| (ix) | पूजादेयम् (Puja Subscription Fee) | Rs. | 20/- |
| (x) | छात्रपरिषद्देयम् (Union Fee) | Rs. | 40/- |
| (xi) | हानिपूरकदेयम् (Insurance Fee) | Rs. | 7/- |
| (xii) | पञ्जीकरणदेयम् (Registration Fee) | Rs. | 40/- |
| (xiii) | सांस्कृतिकदेयम् (Cultural Fee) | Rs. | 100/- |
| (xiv) | सामाजिकसेवा (Social Service) | Rs. | 5/- |
| (xv) | पुस्तकागारसावधानीयदेयम् (Library Caution Money) (प्रत्यवर्त्तनीयम्) | Rs. | 50/- |
| (xvi) | विभागीयपुस्तकागारोन्नयनदेयम् | Rs. | 50/- |
| (xvii) | पुस्तकागारोन्नयनदेयम् | Rs. | 100/- |
| | | Rs. | 566/- |

(ख) मासिकं देयम्

| | | | |
|---|---|---|---|
| (i) | शिक्षणदेयम् (Tuition Fee) Rs. 5 x 12 | Rs. | 60/- |
| (ii) | साधारणकक्षादेयम् (Common Room Fee) Rs. 2 x 12 | Rs. | 24/- |
| | G.Total | Rs. | 650/- |

(ग) नामाङ्कनार्थमुपजातीनामनुसूचितजनजातीनामावेदकानां कृते केवलं पुस्तकागारसावधानीयदेयत्वन (Library Caution Money) पञ्चाशद्रूप्यकाणि (Rs. 50/-) प्रदेयानि ।

14. *छात्रावास: (Hostel)*

(क) छात्राणां (पुरुषाणं महिलानां च) कृते छात्रावासव्यवस्था वर्त्तते ।

(ख) 11 (क) इति संख्याचिह्निते स्तम्भे प्रदर्शिता संरक्षणव्यवस्था छात्रावासे नामाङ्कनार्थमपि अनुस्त्रियते ।

(ग) छात्रावासे नामाङ्कनं शिक्षायोग्यताभित्या भवति ।

(घ) नात्र कश्चन / काचन अधिकारं प्रकटय्य नामाङ्कनं कर्त्तुमर्हेत् ।

(ङ) छात्रावासे नामाङ्कनार्थमावेदनपत्रं / संपृक्तच्छात्रावासकार्यालयाल्लब्धुं शक्यते ।

(च) विश्वविद्यालयेन छात्रावासीयाचारव्यवहारविषयकमार्गदर्शिका प्रस्तुता वर्त्तते यदाधारेण प्रत्येकमन्तेवासी / अन्तेवासिनी मिथ: शृङ्खलामवलम्ब्य तिष्ठेत् ।

(छ) विश्वविद्यालयेन छात्रावासावस्थानार्थं देयं निश्चीयते ।

| | | | |
|---|---|---|---|
| (क) | वार्षिकं देयम् | Rs. | 110/- |
| (ख) | मासिक देयम् | Rs. | 200/- |
| (ग) | Caution Money (प्रत्यावर्त्तनीयम्) | Rs. | 450/- |

(ज) समुचिताधिकरिण: पूर्वानुमतिं न गृहीत्वा न कोऽपि अन्तेवासी / काऽपि अन्तेवासिनी छात्रावासे कञ्चन / काञ्चन अतिथिं वासयेत् ।

**अध्यक्ष:**
**स्नातकोत्तरपरिषद:**
**श्रीजगन्नाथसंस्कृतविश्वविद्यालय:, श्रीविहार, पुरी – 752003**
**दूरभाषसंख्या – 06752-251365**

# विशिष्टाचार्यनामाङ्कननियमावली

**1.** ***विभागीयस्थानानि (Seats)***

(क) अस्य विश्वविद्यालयस्य सप्तसु विभागेषु (ज्योतिर्विज्ञानाविभागं विहाय)विशिष्टाचार्य (M.Phil.) इत्युपाधिलब्धये वर्षमेकमाधिकृत्य शिक्षादानव्यवस्था वर्तते । तदर्थं प्रतिविभागं दशसंख्यकस्थानानि निश्चितानि।

(ख) विश्वविद्यालय: स्वधिकारेण प्रतिविभागं स्थानसंख्यां परिवत्तयितुमर्हति।

**2.** ***प्रवेशार्हता (Eligibility)***

अस्य विश्वविद्यालयस्य अचार्यपरी क्षायाम् अथवा एतद् विश्वविद्यालयमान्यप्राप्तानामन्येषां विश्वविद्यालयानां तत्तुल्यपरिक्षायां न्यूनातिन्यूनं प्रतिशतं पञ्चपञ्चाशदङ्कान् (55%) लब्धवन्त:/ लब्धवत्य: तत्तद्विषयकविभागे प्रवेशार्हा भवन्ति। (एतदविषयकविशेषसुचनार्थं विशिष्टाचार्यपाठ्यक्रमपुस्तिका द्रष्टव्या)।

**3.** ***देयम (Fees)***

| | | |
|---|---|---|
| (i) | नामाङ्कनदेयम् (Admission Fee) | Rs. 20/- |
| (ii) | परिचयपत्रदेयम् (Identity Card Fee) | Rs. 14/- |
| (iii) | सत्रदेयम (Session Fee) | Rs. 20/- |
| (iv) | पञ्जीकरणदेयम ( Registration Fee ) | Rs. 40/- |
| (v) | हानिपूरकदेयम् (Insurance Fee) | Rs. 07/- |
| (vi) | शिक्षणदेयम (Tution Fee) | Rs. 60/- |
| (vii) | सांस्कृतिकदेयम (Cultural Fee) | Rs. 100/- |
| (viii) | पुस्तकागारसावधानीयदेयम् (Library Caution Money) | Rs. 50/- |
| (ix) | पूजादेयम (Puja Subscription Fee) | Rs. 20/- |
| (x) | पत्रिकादेयम | Rs. 20/- |
| (xi) | पुस्तकागारोत्रयनदेयम् (Library Devlopement Fee) | Rs. 150/- |
| (xii) | विभागीयपुस्तकागारोत्रयनदेयम् (Departmental Library Development Fee) | Rs. 100/- |
| | Total | Rs. 601/- |

वि:द्र:-एतदतिरिच्य अन्ये नियमा आचार्यवद् भवन्ति।